# स्वरवर्णाः

डॉ. सुरेन्द्र कुमार शर्मा

भाषारम्भो हि वर्णेभ्यो भाषा वाक्यात्मिका मता।
वाक्यस्य चरमः खण्डो वर्ण इत्यभिधीयते।।1।।

स्वरव्यञ्जनभेदेन वर्णो वै कथितो द्विधा।
स्वरा अ इ उ इत्याद्याः कचाद्या व्यञ्जनानि च।।2।।

स्वरा एव तु विख्याता अच इत्यपि नामतः।
व्यञ्जनानि च ख्यातानि हल इत्यभिधानतः।।3।।

तेषामच् हल् इति संज्ञा प्रत्याहारविधानतः।
अचि सर्वे स्वरा एवं व्यञ्जनानि हलि स्थिताः।।4।।

वर्णान्तरं श्रयन्ते नो स्वयमेव रवन्ति च।
तस्मात्ते 'स्वर' संख्याता अ इ उ ऋ स्वरा यथा।।5।।

स्वरसाहाय्यमादाय शक्यन्ते गदितुं तु ये।
ते वर्णा व्यञ्जनानि स्युस्तद्यथा क च ट तकपाः।।6।।

व्यञ्जनान्ते स्वरो वा स्याद् यथा हि क च ट इति।
अथवा व्यञ्जनात् पूर्वं स्वरः स्याच्च अक् अण् यथा।।7।।

अ इ उ ऋ लृ ए ओ ऐ औ एते नवधा स्वराः।
आद्या प स्वराः शुद्धाः संयुक्तास्त्वपरे मताः।।8।।

अ+इ संयोगत ए स्यात् अ+ए संयोगस्तु ऐ।
अ उ संयोगत ओ स्यात् अ ओ संयोगतस्तु औ।।9।।

अचः अण अकश्चैव इकश्च उक एव च।
इचः एङो च एचश्च ऐचो च लघुसंज्ञया।।10।।

स्वराणां पाणिनिः शास्त्रे निर्देशं कृतवान् स्वयम्।
तथात्वे नैव चास्माभिः कर्तव्या स्वरसूचना।।11।।

अच: सर्वे स्वरा वाच्या अ इ उ ऋ लृ इत्यक:।
इ उ ऋ लृ इक: प्रोक्ता उकश्च उ ऋ लृ इति।।12।।

ए ओ इत्युभकावेङो ऐचो ऐ औ इति द्वयम्।
एच: ए ओ च ऐ औ च अ इ उ त्रितयम् अण:।।13।।

उच्चारणप्रभेदेन भेदकत्वं गतास्त्विमे।
स्वरास्त्रिधा त्रिधा प्रायो ह्रस्वा दीर्घा:प्लुताश्च ते।।14।।

एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्।।15।।

अकारोच्चारणे यावान् कालो मात्रा तु सा मता।
मात्रानुसारतो ज्ञेया ह्रस्वा दीर्घा: प्लुता: स्वरा:।।16।।

अ इ उ ऋ स्वरा एते ह्रस्वा दीर्घा: प्लुता अपि।
ए ओ ऐ औ तु चत्वारो नैव ह्रस्वा इमे मता:।।17।।

लृवर्णस्य विषये तु नियमो भिन्न एव हि।
लृकारो नैव दीर्घ: स्यात् स ह्रस्व: प्लुत एव वा।।18।।

ह्रस्वदीर्घप्लुताश्चापि प्रत्येकं त्रिविधा मता:।
उदात्तश्चानुदात्तश्च स्वरितश्चेति भेदत:।।19।।

स्वस्वस्थानेषूर्ध्वभागे जातश्चोदात्तकस्स्वर:।
अधोभागे तु निष्पन्न: सोऽनुदात्त उदीर्यते।।20।।

स्वस्थानं सर्वभागेन पूरयन् जायते तु य:।
स स्वर: स्वरितो ज्ञेयो व्यवस्थेयं हि भाषिता।।21।।

ह्रस्वदीर्घप्लुतानां हि तदित्थं त्रिविधत्वत:।
अ इ उ ऋ स्वरा एते प्रत्येकं नवधा स्थिता:।।22।।

तेषां नवानां प्रत्येकं द्विधा भेदो भवेत्(पुन:)।
तत्रानुनासिकस्त्वेक: परश्चाननुनासिक:।।23।।

मुखघ्राणोभयाभ्यां हि वर्ण उच्चार्यते तु य:।
यथा हि ञ म ङ ण न इत्येते ह्यनुनासिका:।।24।।

केवलं च मुखेनैव वर्ण उच्चार्यते तु यः।
स्वरो वा व्यञ्जनं वा स भवेदननुनासिकः।।25।।

अ इ उ ऋ नवात्मानो ये पूर्वं प्रतिपादिताः।
तेषामुक्तद्विधाभेदात् सर्वेऽष्टादशतां गताः।।26।।

लृवर्णः षड्विधोऽप्येवं द्विधा द्वादशधा भवेत्।
ए ओ ऐ औ च चत्वारो ये षट् षट् द्वादशापि ते।।27।।

भेदोपभेदतस्त्वेवं ये ये यावद्विधा स्वराः।
परस्परं सवर्णास्ते मन्यन्ते सकला अपि।।28।।

मुखे स्थानं प्रयत्नश्च समानं स्याद् ययोर्द्वयोः।
परस्परं सवर्णत्वं मान्यं ज्ञेयं तयोर्द्वयोः।।29।।

अइउण् सूत्रमारभ्य ऐ ओ च् सूत्रान्तमागताः।
ये वै नव स्वरास्तेषां सवर्णा अपि तद्गताः।।30।।

अतश्च अण् अच् इत्यादि संज्ञाभिः केवलं न ते।
किन्तु तेषां सवर्णाश्च ग्राह्या दीर्घप्लुता अपि।।31।।

अत एव चतुःसूत्र्यां निर्दिष्टेषु स्वरेष्विह।
तत्तदीयसवर्णानाम् अन्येषां नाम न स्थितम्।।32।।

*प्राचार्यचरः,*
*श्री दादू आचार्य संस्कृत महाविद्यालय, जयपुर*